**Nepal Sanskrit University** Symbol No.:______________

# प्राक्शास्त्री

## २०७९

**विषयः :- अनिवार्यव्याकरणम्**

**पत्रम् :- प्रथमम्** **समयः - २० मिनेट**

---

**खण्ड-क**

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** **२०x१=२०**

१. अष्टाध्यायीग्रन्थस्य रचनाकारः कोऽस्ति ?
(क) भट्टोजिदीक्षितः ☐ (ख) नागेशभट्टः ☐
(ग) पाणिनिः ☐ (ङ) पतञ्जलिः ☐

२. वेदाङ्गानि कति सन्ति ?
(क) पञ्च ☐ (ख) षड् ☐ (ग) सप्त ☐ (घ) अष्ट ☐

३. माहेश्वराणि सूत्राणि कति सन्ति ?
(क) द्वादश ☐ (ख) त्रयोदश ☐ (ग) चतुर्दश ☐ (घ) पञ्चदश ☐

४. अच्प्रत्याहारे कति वर्णाः आयान्ति ?
(क) अष्ट ☐ (ख) नव ☐ (ग) दश ☐ (घ) एकादश ☐

५. चवर्गस्य किं स्थानं भवति ?
(क) कण्ठः ☐ (ख) तालु ☐ (ग) मूर्धा ☐ (घ) दन्ताः ☐

६. 'हलन्त्यम्' अनेन सूत्रेण किं विधीयते ?
(क) इत्संज्ञा ☐ (ख) हल्संज्ञा ☐ (ग) लोपसंज्ञा ☐ (घ) उदात्तसंज्ञा ☐

७. गौरी शब्दस्य चतुर्थ्येकवचने किं रूपं भवति ?
(क) गौर्यै ☐ (ख) गौर्या ☐ (ग) गौर्यः ☐ (घ) गौर्याः ☐

८. गुरवे इति रूपं कस्यां विभक्तौ भवति ?
(क) ङे ☐ (ख) ङसि ☐ (ग) ङस् ☐ (घ) ङि ☐

९. नक्तम् शब्दस्य कोऽर्थः ?
(क) रात्री ☐ (ख) दिवा ☐ (ग) सायम् ☐ (घ) प्रातः ☐

१०. संस्कृतव्याकरणे वचनानि कति सन्ति ?
(क) त्रीणि ☐ (ख) द्वे ☐ (ग) चत्वारि ☐ (घ) पञ्च ☐

११ कर्मवाच्ये कर्मणि कतमा विभक्तिर्भवति ?
(क) प्रथमा ☐ (ख) द्वितीया ☐ (ग) तृतीया ☐ (घ) चतुर्थी ☐

१२. लादेशाः कति सन्ति ?
(क) पञ्चदश ☐ (ख) षोडश ☐ (ग) सप्तदश ☐ (घ) अष्टादश ☐

क्रमशः

१३. वृत्धातोर्लटि मध्यमपुरुषस्य द्विवचने किं रूपं भवति ?
(क) वर्तेते ☐ (ख) वर्ते ☐ (ग) वर्तेथे ☐ (घ) वर्तावहे ☐

१४. कारकाणि कति सन्ति ?
(क) पञ्च ☐ (ख) षड् ☐ (ग) सप्त ☐ (घ) अष्ट ☐

१५. 'अभितः कृष्णम्' अस्मिन् कः कारकोऽस्ति ?
(क) प्रथमा ☐ (ख) द्वितीया ☐ (ग) तृतीया ☐ (घ) चतुर्थी ☐

१६. नमस् योगे का विभक्तिर्भवति ?
(क) चतुर्थी ☐ (ख) पञ्चमी ☐ (ग) षष्ठी ☐ (घ) सप्तमी ☐

१७. 'समानकर्तृकयोः पूर्वकाले' अनेन सूत्रेण कः प्रत्ययो भवति ?
(क) क्त्वा ☐ (ख) तुमुन् ☐ (ग) ण्वुल् ☐ (घ) क्त ☐

१८. 'घनश्यामः' अत्र कः समासो भवति ?
(क) अव्ययीभावः ☐ (ख) कर्मधारयः ☐
(ग) बहुव्रीहिः ☐ (घ) द्वन्द्वः ☐

१९. 'राष्ट्रियः' अस्मिन् प्रयोगे कः प्रत्ययो भवति ?
(क) अण् ☐ (ख) घ ☐ (ग) छण् ☐ (घ) फक् ☐

२०. 'गौरी' इत्यस्मिन् प्रयोगे कः प्रत्ययो भवति ?
(क) ङीष् ☐ (ख) ङीप् ☐ (ग) ङीन् ☐ (घ) टाप् ☐

–: ० :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री
## २०७९

पूर्णाङ्काः - १००

विषयः :- अनिवार्यव्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- प्रथमम् समयः - घण्टात्रयम्

| | |
|---|---|
| (क) | परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् । |
| (ख) | दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥ |

### खण्ड-ख

अधस्तनाः सर्वे प्रश्नाः समाधेयाः – १४×४ = ५६

१. पाणिनेः संक्षिप्तः परिचयो देयः ।

अथवा

ह, श वर्णयोः स्थानं लिखित्वा 'मुखनासिकावचनोऽनुनासिकः' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

२. हरिशब्दस्य सर्वाणि रूपाणि लिखत ।

३. अधो लिखितानामव्ययशब्दानामर्थं लिखत–

(क) अन्तर् (ख) श्वस् (ग) तूष्णीम् (घ) निकषा

४. स्थाधातोर्लटि सर्वाणि रूपाणि लिखत ।

५. लिख्धातोर्कर्मणि लटि सर्वाणि रूपाणि लिखत ।

अथवा

भूधातोर्लुङि सर्वाणि रूपाणि लिखत ।

६. द्वितीयाविभक्तिः कस्मिन्नर्थे भवति ।

७. 'ध्रुवमपायेऽपादानम्' इति सुत्रस्योदाहरणमर्थञ्च लिखत ।

८. 'साधकतमं करणम्' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

९. समासलक्षणं भेदञ्च लिखत ।

१०. अधोलिखितानां समस्तशब्दानां विग्रहं कुरुत–

(क) उपगङ्गम् (ख) शङ्कुलाखण्डः (ग) चित्रगुः (घ) धवखदिरौ

११ 'कालसमयवेलासु तुमुन्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

१२. 'तदधीते तद्वेदः' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

१३. प्रकृतिप्रत्ययान् विभजत–

(क) पठितव्यम् (ख) कारकः

(ग) पठित्वा (घ) भवन्

क्रमशः

१४. रामेण, पितरः, राज्ञः, रमायै, ज्ञानानि एषु चतुरः प्रयोगान् साधयत ।

अथवा

ते, कस्मै, त्वम्, वारि, दध्ना एषु चतुरः प्रयोगान् साधयत ।

### खण्ड-ग

त्रयः प्रश्नाः समाधेयाः – ३×८ = २४

१५. लाकृतिः, रमेशः, पावकः, सच्चित्, जगदीशः एषु चतुरः प्रयोगान् प्रमुखसूत्रनिर्देशपूर्वकं साधयत ।

अथवा

पुंल्लिङ्गे सर्वशब्दस्य सर्वाणि रूपाणि लिखत ।

१६. भूधातोर्यङन्ते लटि सर्वाणि रूपाणि लिखत ।

अथवा

पठ्धातोर्ण्यन्ते लटि सर्वाणि रूपाणि लिखत ।

१७. कृञ्धातोः सन्नन्तस्य लटि सर्वाणि रूपाणि लिखत ।

अथवा

भावक्रियायाम् हस्धातोर्लटि सर्वाणि रूपाणि लिखत ।

–: ० :–